# 2021 Five Week Fall Vedanta Course

September 29th to November 1st, 2021

## Swami Tattvavidanandaji

on

*śrīmacchaṅkarabhagavatpūjyapādaviracitam*

# *Catussūtrī Brahmasūtrabhāṣyam*

श्रीमच्छङ्करभगवत्पूज्यपादविरचितम्

# चतुःसूत्री ब्रह्मसूत्रभाष्यम्

Arsha Vidya Gurukulam
P.O. Box 1059
Saylorsburg, PA 18353

www.arshavidya.org
www.myarshavidya.org

# Fall Vedanta Course - 2021

## (Wednesday, Sept.29 – Monday, Nov 1st, 2021)

## SCHEDULE

### Tuesday, September 28th

12 Noon – 10:00 pm Registration, evening Arati and Dinner

### Wednesday, September 29th

| | | |
|---|---|---|
| 5:45 – 6:45 | a.m. | Abhisheka to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 7:00 – 8:45 | a.m. | Breakfast |
| 9:00 – 9:25 | a.m. | Welcome Address & Orientation – Suddhatma Chaitanya |
| 9:30 – 10:30 | a.m. | Class I - श्रीमच्छङ्करभगवत्पूज्यपादविरचितं चतु:सूत्री ब्रह्मसूत्रभाष्यम् Swami Tattvavidanandaji |
| 10:30 – 11:00 | a.m. | Coffee/Tea Break |
| 11:15 – 12:00 | p.m. | संस्कृतम् *saṃskṛtam* Class in Lecture Hall Swami Muktatmanandaji |
| 12:15 – 12:30 | p.m. | Arati |
| 12:30 – 1: 30 | p.m. | Lunch |
| 1:30 – 3:00 | p.m. | Free time |
| 1:30 – 2:15 | p.m. | संस्कृतम् *saṃskṛtam* – Beginner's Class – Terry Coe |
| 4:00 – 5:00 | p.m. | Class II - श्रीमच्छङ्करभगवत्पूज्यपादविरचितं चतु:सूत्री ब्रह्मसूत्रभाष्यम् Swami Tattvavidanandaji |
| 6:00 - 6:30 | p.m. | Evening Arati |
| 6:35 – 7:25 | p.m. | Dinner |
| 7:30 – 8:30 | p.m. | Satsang (Q&A) with Swami Tattvavidanandaji |

PLEASE NOTE – PRADOSHA PUJA
ON OCTOBER 4 / 18TH.

**Fall Vedanta Course – 2021 with Swami Tattvavidanandaji**

**Thursday, September 30th onward till Nov 01 end of the course**

**Tue to Sat - Full schedule, <u>Sunday till Lunchtime</u>**
**Meditation Classes Wed-Sun**

| | | |
|---|---|---|
| 5:45 – 6:45 | a.m. | Abhisheka to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 7:00 – 7:30 | a.m. | Guided Meditation – Swami Tattvavidanandaji |
| 7:30 – 9:15 | a.m. | Breakfast |
| 7:45 – 8:30 | a.m. | Yoga with Arpan (Wed, Thu, Fri & Sat)<br>Yoga with Monica (Sun & Tue)<br>**Venue: Yoga Studio** |
| 8:15 – 9:15 | a.m. | Gurukulam Seva |
| 9:30 – 10:30 | a.m. | Class I - **श्रीमच्छङ्करभगवत्पूज्यपादविरचितं चतु:सूत्री ब्रह्मसूत्रभाष्यम्**<br>Swami Tattvavidanandaji |
| 10:30 – 11:00 | a.m. | Coffee/Tea Break/Warm Water |
| | | |
| 11:15 – 12:00 | Noon | संस्कृतम् *saṃskṛtam* Class in Lecture Hall<br>Swami Muktatmanandaji |
| 12:15 – 12:30 | p.m. | Arati to दक्षिणामूर्ति Dakṣiṇāmūrti |
| 12:30 – 1:30 | p.m. | Lunch |
| 1:30 – 3:00 | p.m. | Free time |
| 1:30 – 2:15 | p.m. | संस्कृतम् *saṃskṛtam* – Beginner's Class – Terry Coe |
| | | |
| 4:00 – 5:00 | p.m. | Class II - **श्रीमच्छङ्करभगवत्पूज्यपादविरचितं चतु:सूत्री ब्रह्मसूत्रभाष्यम्**<br>Swami Tattvavidanandaji |
| 6:00 – 6:30 | p.m. | Arati to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 6:30 – 7:30 | p.m. | Dinner |
| 7:30 – 8:30 | p.m. | Satsang (Q&A) with Swami Tattvavidanandaji |

# Sunday Schedule
# ( 2nd and 4th Weekend Oct 10 & 24)

| | | |
|---|---|---|
| 5:45 – 6:45 | a.m. | Abhisheka to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 7:00 – 7:30 | a.m. | Guided Meditation – Swami Tattvavidanandaji |
| 7:30 – 9:15 | a.m. | Breakfast |
| 7:45 – 8:30 | a.m. | Yoga with Monica |
| 8:15 – 9:15 | a.m. | Gurukulam Seva |
| | | |
| 9:30 – 10:30 | a.m. | **श्रीमच्छङ्करभगवत्पूज्यपादविरचितं चतु:सूत्री ब्रह्मसूत्रभाष्यम्** Swami Tattvavidanandaji |
| | | |
| 11:30 | a.m. | Arati to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 11:30 | am | Early Lunch |
| | | ***The rest of Sunday and Every Monday is free time NO MEDITATION CLASS ON every Tuesday** |

# Sunday Schedule (Oct 3 & 17, 1st and 3rd )

| | | |
|---|---|---|
| 5:45 – 6:45 | a.m. | Abhisheka to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 7:00 – 7:30 | a.m. | Guided Meditation – Swami Tattvavidanandaji |
| 7:30 - 9:15 | am | Breakfast |
| 7:45 – 8:30 | a.m. | Yoga with Monica |
| 8:15 – 9:15 | a.m. | Gurukulam Seva |
| | | |
| 10:00 – 11:00 | a.m. | **श्रीमच्छङ्करभगवत्पूज्यपादविरचितं चतु:सूत्री ब्रह्मसूत्रभाष्यम्** Swami Tattvavidanandaji . **(Weekend students will join in this class)** |
| | | |
| 11:00 – 11:25 | a.m. | Coffee/Tea Break/Warm Water |
| 11:30 – 12:15 | p.m. | Bhagavadgita Weekend Class - Swami Tattvavidanandaji |
| 12:00 – 12:15 | p.m. | Arati to Lord दक्षिणामूर्ति Dakṣiṇāmūrti |
| 12:15 – 1:15 | p.m. | Lunch - /After lunch No **Q & A for Weekend students** |
| | | ***The rest of Sunday and Every Monday is free time NO MEDITATION CLASS ON every Tuesday** |

# Śanti Mantras

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु । मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

*om saha nāvavatu | saha nau bhunaktu | saha vīryaṁ karavāvahai |*
*tejasvināvadhītamastu | mā vidviṣāvahai || om śāntiḥ śāntiḥ śāntiḥ || 1 ||*

***saḥ*** -- he; ***ha*** -- indeed; ***nau*** -- both of us; ***avatu*** – may protect; ***saḥ*** -- he; ***ha*** -- indeed; ***nau*** -- both of us; ***bhunaktu*** – may nourish; ***saha*** – together; ***vīryaṁ karavāvahai*** – may we acquire the capacity (to study and understand the scriptures); ***tejasvi*** – brilliant; ***nau*** -- for us; ***adhītam*** – what is studied; ***astu*** -- let it be; ***mā vidviṣāvahai*** -- may we not disagree with each other; ***om śāntiḥ śāntiḥ śāntiḥ*** -- om peace, peace, peace

May the Lord indeed, protect both of us. May he indeed, nourish both of us. May we together acquire the capacity (to study and understand the scriptures). May our study be brilliant. May we not disagree with each other. Om peace, peace, peace.

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

*om pūrṇamadaḥ pūrṇamidaṁ pūrṇātpūrṇamudacyate |*
*pūrṇasya pūrṇamādāya pūrṇamevāvaśiṣyate ||*
*om śāntiḥ śāntiḥ śāntiḥ || 2 ||*

***pūrṇam*** – is fullness; ***adaḥ*** -- that; ***pūrṇam*** – is fullness; ***idaṁ*** -- this; ***pūrṇāt*** – from that fullness; ***pūrṇam*** – this fullness; ***udacyate*** – has come; ***pūrṇasya*** – of that fullness; ***pūrṇam*** – this fullness; ***ādāya*** – having removed; ***pūrṇam*** – the fullness; ***eva*** – only; ***avaśiṣyate*** – remains; ***om śāntiḥ śāntiḥ śāntiḥ*** -- om peace, peace, peace

That is fullness, this is fullness. From that fullness this fullness came. From that fullness this fullness removed, what remains is fullness. Om peace, peace, peace.

# Guru Vandanam

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पादं शङ्करं लोकशङ्करम् ॥

śrutismṛtipurāṇānām ālayaṁ karuṇālayam |
namāmi bhagavatpādaṁ śaṅkaraṁ lokaśaṅkaram ||

***śruti-smṛti-purāṇānām*** – of the śruti (Vedas), smṛti (Gitā etc.) and the purāṇās. ***ālayaṁ*** -- the abode; ***karuṇālayam*** – the repository of compassion; ***namāmi*** – I salute; ***bhagavat-pādaṁ*** -- one who is revered; ***śaṅkaraṁ*** -- Ādi Śankarācārya; ***loka-śaṅkaram*** – the one who gives happiness to the world.

I salute Ādi Śankarācārya, the abode of the śruti (Vedas), smṛti (Gitā etc.) and purāṇās, the repository of compassion, who gives happiness to the world and who is revered.

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥

śaṅkaraṁ śaṅkarācāryaṁ keśavaṁ bādarāyaṇam |
sūtrabhāṣyakṛtau vande bhagavantau punaḥ punaḥ ||

***śaṅkaraṁ*** -- Lord Śiva; ***śaṅkarācāryaṁ*** -- the great teacher Ādi Śankarācārya; ***keśavaṁ*** -- Lord Viṣṇu ; ***bādarāyaṇam*** -- Śri Vyāsa; ***sūtra-bhāṣya-kṛtau*** – the two who worte the aphorisms (*BrahmaSūtras*) and the commentary (*bhāṣya*); ***vande*** – I salute; ***bhagavantau*** -- the venerable ones; ***punaḥ punaḥ*** -- again and again.

I salute, again and again, the great teacher Ādi Śankarācārya, who is Lord Śiva, and Badarayana, who is Lord Viṣṇu, the venerable ones who wrote the *bhāṣya* and the *BrahmaSūtras* respectively.

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

īśvaro gururātmeti mūrtibhedavibhāgine |
vyomavadvyāptadehāya dakṣiṇāmūrtaye namaḥ ||

***īśvaraḥ*** -- the Lord; ***guruḥ*** – the teacher; ***ātmā*** – the Self; ***iti*** – thus; ***mūrti-bheda-vibhāgine*** – the one who appears (as though) divided; ***vyomavat*** – like space; ***vyāpta-dehāya*** – to the one who is all pervasive; ***dakṣiṇāmūrtaye*** – to Lord Dakṣiṇāmūrti; ***namaḥ*** -- salutation.

Salutation to Lord Dakṣiṇāmūrti who is all pervasive like space, but who appears (as though) divided as the Lord, the teacher and the Self.

## श्रीमच्छङ्करभगवत्पूज्यपादविरचितम्

# ब्रह्मसूत्रभाष्यम्

प्रथमः पादः

युष्मदस्मत्प्रत्ययगोचरयोर्विषयविषयिणोस्तमःप्रकाशवद्विरुद्धस्वभावयोरितरेतरभावानुपपत्तौ सिद्धायाम् , तद्धर्माणामपि सुतरामितरेतरभावानुपपत्तिः — इत्यतः अस्मत्प्रत्ययगोचरे विषयिणि चिदात्मके युष्मत्प्रत्ययगोचरस्य विषयस्य तद्धर्माणां चाध्यासः तद्विपर्ययेण विषयिणस्तद्धर्माणां च विषयेऽध्यासो मिथ्येति भवितुं युक्तम् । तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्योन्यधर्मांश्चाध्यस्येतरेतराविवेकेन अत्यन्तविविक्तयोर्धर्मधर्मिणोः मिथ्याज्ञाननिमित्तः सत्यानृते मिथुनीकृत्य 'अहमिदम्' 'ममेदम्' इति नैसर्गिकोऽयं लोकव्यवहारः ॥

आह — कोऽयमध्यासो नामेति । उच्यते — स्मृतिरूपः परत्र पूर्वदृष्टावभासः । तं केचित् अन्यत्रान्यधर्माध्यास इति वदन्ति । केचित्तु यत्र यदध्यासः तद्विवेकाग्रहनिबन्धनो भ्रम इति । अन्ये तु यत्र यदध्यासः तस्यैव विपरीतधर्मत्वकल्पनामाचक्षते । सर्वथापि तु अन्यस्यान्यधर्मावभासतां न व्यभिचरति । तथा च लोकेऽनुभवः — शुक्तिका हि रजतवदवभासते, एकश्चन्द्रः सद्वितीयवदिति ॥

कथं पुनः प्रत्यगात्मन्यविषये अध्यासो विषयतद्धर्माणाम् ? सर्वो हि पुरोऽवस्थित एव विषये विषयान्तरमध्यस्यति ; युष्मत्प्रत्ययापेतस्य च प्रत्यगात्मनः अविषयत्वं ब्रवीषि । उच्यते — न तावदयमेकान्तेनाविषयः, अस्मत्प्रत्ययविषयत्वात् अपरोक्षत्वाच्च

प्रत्यगात्मप्रसिद्धेः ; न चायमस्ति नियमः — पुरोऽवस्थित एव विषये विषयान्तरमध्यसितव्यमिति ; अप्रत्यक्षेऽपि ह्याकाशे बालाः तलमलिनतादि अध्यस्यन्ति ; एवमविरुद्धः प्रत्यगात्मन्यपि अनात्माध्यासः ॥

तमेतमेवंलक्षणमध्यासं पण्डिता अविद्येति मन्यन्ते । तद्विवेकेन च वस्तुस्वरूपावधारणं विद्यामाहुः । तत्रैवं सति, यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वा अणुमात्रेणापि स न सम्बध्यते । तमेतमविद्याख्यमात्मानात्मनोरितरेतराध्यासं पुरस्कृत्य सर्वे प्रमाणप्रमेयव्यवहारा लौकिका वैदिकाश्च प्रवृत्ताः, सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि । कथं पुनरविद्यावद्विषयाणि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति, उच्यते — देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः । न हीन्द्रियाण्यनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति । न चाधिष्ठानमन्तरेण इन्द्रियाणां व्यापारः सम्भवति । न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते । न चैतस्मिन् सर्वस्मिन्नसति असङ्गस्यात्मनः प्रमातृत्वमुपपद्यते । न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति । तस्मादविद्यावद्विषयाण्येव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि चेति । पश्वादिभिश्चाविशेषात् । यथा हि पश्वादयः शब्दादिभिः श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञाने प्रतिकूले जाते ततो निवर्तन्ते, अनुकूले च प्रवर्तन्ते ; यथा दण्डोद्यतकरं पुरुषमभिमुखमुपलभ्य ‘मां हन्तुमयमिच्छति’ इति पलायितुमारभन्ते, हरिततृणपूर्णपाणिमुपलभ्य तं प्रति अभिमुखीभवन्ति ; एवं पुरुषा अपि व्युत्पन्नचित्ताः क्रूरदृष्टीनाक्रोशतः खड्गोद्यतकरान्बलवत उपलभ्य ततो निवर्तन्ते, तद्विपरीतान्प्रति प्रवर्तन्ते । अतः समानः पश्वादिभिः पुरुषाणां प्रमाणप्रमेयव्यवहारः । पश्वादीनां च

प्रसिद्धः अविवेकपूर्वकः प्रत्यक्षादिव्यवहारः । तत्सामान्यदर्शनाद्व्युत्पत्तिमतामपि पुरुषाणां प्रत्यक्षादिव्यवहारस्तत्कालः समान इति निश्चीयते । शास्त्रीये तु व्यवहारे यद्यपि बुद्धिपूर्वकारी नाविदित्वा आत्मनः परलोकसम्बन्धमधिक्रियते, तथापि न वेदान्तवेद्यमशनायाद्यतीतमपेतब्रह्मक्षत्रादिभेदमसंसार्यात्मतत्त्वमधिकारेऽपेक्ष्यते, अनुपयोगात् अधिकारविरोधाच्च । प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्यावद्विषयत्वं नातिवर्तते । तथा हि — 'ब्राह्मणो यजेत' इत्यादीनि शास्त्राण्यात्मनि वर्णाश्रमवयोऽवस्थादिविशेषाध्यासमाश्रित्य प्रवर्तन्ते । अध्यासो नाम अतस्मिंस्तद्बुद्धिरित्यवोचाम । तद्यथा — पुत्रभार्यादिषु विकलेषु सकलेषु वा अहमेव विकलः सकलो वेति बाह्यधर्मानात्मन्यध्यस्यति ; तथा देहधर्मान् 'स्थूलोऽहं कृशोऽहं गौरोऽहं तिष्ठामि गच्छामि लङ्घयामि च' इति ; तथेन्द्रियधर्मान् — 'मूकः काणः क्लीबो बधिरोऽन्धोऽहम्' इति ; तथान्तःकरणधर्मान् कामसङ्कल्पविचिकित्साध्यवसायादीन् । एवमहंप्रत्ययिनमशेषस्वप्रचारसाक्षिणि प्रत्यगात्मन्यध्यस्य तं च प्रत्यगात्मानं सर्वसाक्षिणं तद्विपर्ययेणान्तःकरणादिष्वध्यस्यति । एवमयमनादिरनन्तो नैसर्गिकोऽध्यासो मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः । अस्यानर्थहेतोः प्रहाणाय आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते । यथा चायमर्थः सर्वेषां वेदान्तानाम् , तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः । वेदान्तमीमांसाशास्त्रस्य व्याचिख्यासितस्येदमादिमं सूत्रम् —

# जिज्ञासाधिकरणम्

## अथातो ब्रह्मजिज्ञासा ॥ १ ॥

तत्र अथशब्दः आनन्तर्यार्थः परिगृह्यते ; नाधिकारार्थः, ब्रह्मजिज्ञासाया अनधिकार्यत्वात् ; मङ्गलस्य च वाक्यार्थे समन्वयाभावात् ; अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति ; पूर्वप्रकृतापेक्षायाश्च फलत आनन्तर्याव्यतिरेकात् । सति च आनन्तर्यार्थत्वे, यथा धर्मजिज्ञासा पूर्ववृत्तं वेदाध्ययनं नियमेनापेक्षते, एवं ब्रह्मजिज्ञासापि यत्पूर्ववृत्तं नियमेनापेक्षते तद्वक्तव्यम् । स्वाध्यायानन्तर्यं तु समानम् । नन्विह कर्मावबोधानन्तर्यं विशेषः ; न ; धर्मजिज्ञासायाः प्रागपि अधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः । यथा च हृदयाद्यवदानानामानन्तर्यनियमः, क्रमस्य विवक्षितत्वात् , न तथेह क्रमो विवक्षितः ; शेषशेषित्वे अधिकृताधिकारे वा प्रमाणाभावात् । धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च । अभ्युदयफलं धर्मज्ञानम् , तच्चानुष्ठानापेक्षम् ; निःश्रेयसफलं तु ब्रह्मज्ञानम् , न चानुष्ठानान्तरापेक्षम् ; भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात् ; इह तु भूतं ब्रह्म जिज्ञास्यं नित्यत्वान्न पुरुषव्यापारतन्त्रम् । चोदनाप्रवृत्तिभेदाच्च । या हि चोदना धर्मस्य लक्षणम् , सा स्वविषये नियुञ्जानैव पुरुषमवबोधयति । ब्रह्मचोदना तु पुरुषमवबोधयत्येव केवलम् , अवबोधस्य चोदनाजन्यत्वात् , न पुरुषोऽवबोधे नियुज्यते — यथा अक्षार्थसन्निकर्षेणार्थावबोधे, तद्वत् । तस्मात्किमपि वक्तव्यम् , यदनन्तरं ब्रह्मजिज्ञासोपदिश्यत इति । उच्यते — नित्यानित्यवस्तुविवेकः, इहामुत्रार्थभोगविरागः, शमदमादिसाधनसम्पत् , मुमुक्षुत्वं च

। तेषु हि सत्सु , प्रागपि धर्मजिज्ञासाया ऊर्ध्वं च, शक्यते ब्रह्म जिज्ञासितुं ज्ञातुं च ; न विपर्यये । तस्मात् अथशब्देन यथोक्तसाधनसम्पत्त्यानन्तर्यमुपदिश्यते ॥

अतःशब्दः हेत्वर्थः । यस्माद्वेद एव अग्निहोत्रादीनां श्रेयःसाधनानामनित्यफलतां दर्शयति — 'तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा. उ. ८ । १ । ६) इत्यादिः ; तथा ब्रह्मज्ञानादपि परं पुरुषार्थं दर्शयति — 'ब्रह्मविदाप्नोति परम्' (तै. उ. २ । १ । १) इत्यादिः ; तस्मात् यथोक्तसाधनसम्पत्त्यनन्तरं ब्रह्मजिज्ञासा कर्तव्या ॥

ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्म च वक्ष्यमाणलक्षणम् 'जन्माद्यस्य यतः' इति । अत एव न ब्रह्मशब्दस्य जात्याद्यर्थान्तरमाशङ्कितव्यम् । ब्रह्मण इति कर्मणि षष्ठी, न शेषे ; जिज्ञास्यापेक्षत्वाज्जिज्ञासायाः, जिज्ञास्यान्तरानिर्देशाच्च । ननु शेषषष्ठीपरिग्रहेऽपि ब्रह्मणो जिज्ञासाकर्मत्वं न विरुध्यते, सम्बन्धसामान्यस्य विशेषनिष्ठत्वात् ; एवमपि प्रत्यक्षं ब्रह्मणः कर्मत्वमुत्सृज्य सामान्यद्वारेण परोक्षं कर्मत्वं कल्पयतो व्यर्थः प्रयासः स्यात् । न व्यर्थः, ब्रह्माश्रिताशेषविचारप्रतिज्ञानार्थत्वादिति चेत् , न ; प्रधानपरिग्रहे तदपेक्षितानामर्थाक्षिप्तत्वात् । ब्रह्म हि ज्ञानेनाप्तुमिष्टतमत्वात्प्रधानम् । तस्मिन्प्रधाने जिज्ञासाकर्मणि परिगृहीते, यैर्जिज्ञासितैर्विना ब्रह्म जिज्ञासितं न भवति, तान्यर्थाक्षिप्तान्येवेति न पृथक्सूत्रयितव्यानि । यथा 'राजासौ गच्छति' इत्युक्ते सपरिवारस्य राज्ञो गमनमुक्तं भवति, तद्वत् । श्रुत्यनुगमाच्च । 'यतो वा इमानि भूतानि जायन्ते' (तै. उ. ३ । १ । १)इत्याद्याः श्रुतयः 'तद्विजिज्ञासस्व तद्ब्रह्म' (तै. उ. ३ । १ । १) इति प्रत्यक्षमेव ब्रह्मणो जिज्ञासाकर्मत्वं दर्शयन्ति । तच्च कर्मणिषष्ठीपरिग्रहे सूत्रेणानुगतं भवति । तस्माद्ब्रह्मण इति कर्मणि षष्ठी ॥

ज्ञातुमिच्छा जिज्ञासा । अवगतिपर्यन्तं ज्ञानं सन्वाच्याया इच्छायाः कर्म, फलविषयत्वादिच्छायाः । ज्ञानेन हि प्रमाणेनावगन्तुमिष्टं ब्रह्म । ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात् । तस्माद्ब्रह्म जिज्ञासितव्यम् ॥

तत्पुनर्ब्रह्म प्रसिद्धमप्रसिद्धं वा स्यात् ; यदि प्रसिद्धं न जिज्ञासितव्यम् । अथाप्रसिद्धं नैव शक्यं जिज्ञासितुमिति । उच्यते — अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितम् । ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते, बृंहतेर्धातोरर्थानुगमात् । सर्वस्यात्मत्वाच्च ब्रह्मास्तित्वप्रसिद्धिः । सर्वो ह्यात्मास्तित्वं प्रत्येति, न 'नाहमस्मि' इति । यदि हि नात्मास्तित्वप्रसिद्धिः स्यात्, सर्वो लोकः 'नाहमस्मि' इति प्रतीयात् । आत्मा च ब्रह्म । यदि तर्हि लोके ब्रह्म आत्मत्वेन प्रसिद्धमस्ति, ततो ज्ञातमेवेत्यजिज्ञास्यत्वं पुनरापन्नम् ; न ; तद्विशेषं प्रति विप्रतिपत्तेः । देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृता जना लोकायतिकाश्च प्रतिपन्नाः । इन्द्रियाण्येव चेतनान्यात्मेत्यपरे । मन इत्यन्ये । विज्ञानमात्रं क्षणिकमित्येके । शून्यमित्यपरे । अस्ति देहादिव्यतिरिक्तः संसारी कर्ता भोक्तेत्यपरे । भोक्तैव केवलं न कर्तेत्येके । अस्ति तद्व्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति केचित् । आत्मा स भोक्तुरित्यपरे । एवं बहवो विप्रतिपन्ना युक्तिवाक्यतदाभाससमाश्रयाः सन्तः । तत्राविचार्य यत्किञ्चित्प्रतिपद्यमानो निःश्रेयसात्प्रतिहन्येत, अनर्थं चेयात् । तस्माद्ब्रह्मजिज्ञासोपन्यासमुखेन वेदान्तवाक्यमीमांसा तदविरोधितर्कोपकरणा निःश्रेयसप्रयोजना प्रस्तूयते ॥ १ ॥

# जन्माद्यधिकरणम्

ब्रह्म जिज्ञासितव्यमित्युक्तम् । किंलक्षणं पुनस्तद्ब्रह्मेत्यत आह भगवान्सूत्रकारः —

## जन्माद्यस्य यतः ॥ २ ॥

जन्म उत्पत्तिः आदिः अस्य — इति तद्गुणसंविज्ञानो बहुव्रीहिः । जन्मस्थितिभङ्गं समासार्थः । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च । श्रुतिनिर्देशस्तावत् — 'यतो वा इमानि भूतानि जायन्ते' (तै. उ. ३ । १ । १) इति, अस्मिन्वाक्ये जन्मस्थितिप्रलयानां क्रमदर्शनात् । वस्तुवृत्तमपि — जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसम्भवात् । अस्येति प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमा निर्देशः । षष्ठी जन्मादिधर्मसम्बन्धार्था । यत इति कारणनिर्देशः । अस्य जगतो नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात्सर्वशक्तेः कारणाद्भवति, तद्ब्रह्मेति वाक्यशेषः । अन्येषामपि भावविकाराणां त्रिष्वेवान्तर्भाव इति जन्मस्थितिनाशानामिह ग्रहणम् । यास्कपरिपठितानां तु 'जायतेऽस्ति' इत्यादीनां ग्रहणे तेषां जगतः स्थितिकाले सम्भाव्यमानत्वान्मूलकारणादुत्पत्तिस्थितिनाशा जगतो न गृहीताः स्युरित्याशङ्क्येत ; तन्मा शङ्कि ; इति या उत्पत्तिर्ब्रह्मणः , तत्रैव स्थितिः प्रलयश्च, त एव गृह्यन्ते । न च यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वा, अन्यतः प्रधानादचेतनात् अणुभ्यः अभावात् संसारिणो वा उत्पत्त्यादि सम्भावयितुं शक्यम् । न

च स्वभावतः, विशिष्टदेशकालनिमित्तानामिहोपादानात् । एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यन्ते ईश्वरकारणवादिनः ॥

नन्विहापि तदेवोपन्यस्तं जन्मादिसूत्रे ; न ; वेदान्तवाक्यकुसुमग्रथनार्थत्वात्सूत्राणाम् । वेदान्तवाक्यानि हि सूत्रैरुदाहृत्य विचार्यन्ते । वाक्यार्थविचारणाध्यवसाननिर्वृत्ता हि ब्रह्मावगतिः, नानुमानादिप्रमाणान्तरनिर्वृत्ता । सत्सु तु वेदान्तवाक्येषु जगतो जन्मादिकारणवादिषु , तदर्थग्रहणदार्ढ्याय अनुमानमपि वेदान्तवाक्याविरोधि प्रमाणं भवत् , न निवार्यते, श्रुत्यैव च सहायत्वेन तर्कस्याभ्युपेतत्वात् । तथा हि — 'श्रोतव्यो मन्तव्यः' (बृ. उ. २ । ४ । ५) इति श्रुतिः 'पण्डितो मेधावी गन्धारानेवोपसम्पद्येतैवमेवेहाचार्यवान्पुरुषो वेद' (छा. उ. ६ । १४ । २) इति च पुरुषबुद्धिसाहाय्यमात्मनो दर्शयति । न धर्मजिज्ञासायामिव श्रुत्यादय एव प्रमाणं ब्रह्मजिज्ञासायाम् । किन्तु श्रुत्यादयोऽनुभवादयश्च यथासम्भवमिह प्रमाणम् , अनुभवावसानत्वाद्भूतवस्तुविषयत्वाच्च ब्रह्मज्ञानस्य । कर्तव्ये हि विषये नानुभवापेक्षास्तीति श्रुत्यादीनामेव प्रामाण्यं स्यात् , पुरुषाधीनात्मलाभत्वाच्च कर्तव्यस्य । कर्तुमकर्तुमन्यथा वा कर्तुं शक्यं लौकिकं वैदिकं च कर्म ; यथा अश्वेन गच्छति, पद्भ्याम् , अन्यथा वा, न वा गच्छतीति । तथा 'अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णाति' 'उदिते जुहोति, अनुदिते जुहोति' इति । विधिप्रतिषेधाश्च अत्र अर्थवन्तः स्युः, विकल्पोत्सर्गापवादाश्च । न तु वस्तु 'एवम् , नैवम्' 'अस्ति, नास्ति' इति वा विकल्प्यते । विकल्पनास्तु पुरुषबुद्ध्यपेक्षाः । न वस्तुयाथात्म्यज्ञानं पुरुषबुद्ध्यपेक्षम् । किं तर्हि ? वस्तुतन्त्रमेव तत् । न हि स्थाणावेकस्मिन् 'स्थाणुर्वा, पुरुषोऽन्यो वा' इति तत्त्वज्ञानं भवति । तत्र 'पुरुषोऽन्यो वा' इति मिथ्याज्ञानम् । 'स्थाणुरेव' इति तत्त्वज्ञानम् ,

वस्तुतन्त्रत्वात् । एवं भूतवस्तुविषयाणां प्रामाण्यं वस्तुतन्त्रम् । तत्रैवं सति ब्रह्मज्ञानमपि वस्तुतन्त्रमेव, भूतवस्तुविषयत्वात् । ननु भूतवस्तुविषयत्वे ब्रह्मणः प्रमाणान्तरविषयत्वमेवेति वेदान्तवाक्यविचारणा अनर्थिकैव प्राप्ता ; न ; इन्द्रियाविषयत्वेन सम्बन्धाग्रहणात् । स्वभावतो विषयविषयाणीन्द्रियाणि, न ब्रह्मविषयाणि । सति हीन्द्रियविषयत्वे ब्रह्मणः, इदं ब्रह्मणा सम्बद्धं कार्यमिति गृह्येत । कार्यमात्रमेव तु गृह्यमाणम् — किं ब्रह्मणा सम्बद्धम् ? किमन्येन केनचिद्वा सम्बद्धम् ? — इति न शक्यं निश्चेतुम् । तस्माज्जन्मादिसूत्रं नानुमानोपन्यासार्थम् । किं तर्हि ? वेदान्तवाक्यप्रदर्शनार्थम् । किं पुनस्तद्वेदान्तवाक्यं यत् सूत्रेणेह लिलक्षयिषितम् ? 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति' (तै. उ. ३ । १ । १) इत्युपक्रम्याह — 'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । ' (तै. उ. ३ । १ । १) तस्य च निर्णयवाक्यम् — 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्ति' (तै. उ. ३ । ६ । १) इति । अन्यान्यप्येवंजातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्तव्यानि ॥ २ ॥